# D.A.V. PUBLIC SCHOOL, NEW PANVEL

Plot No. 267, 268, Sector-10, New Panvel,
Navi Mumbai-410206 (Maharashtra).
Phone 022-27468211, 27451793, 27482276
E-mail – davnewpanvel@gmail.com, www.davnewpanvel.com

## PRACTICE PAPER FOR
## II PREPARATORY EXAMINATION 2015-2016
## STD:- IX

**Sub: - Sanskrit** | **Time:- 3 Hours**
**Date:-** | **Marks:- 90**

निर्देश ः

क) परीक्षापत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्ड क | अपठित अवबोधनम् | 10 अंक |
| खण्ड ख | रचनात्मक लेखनम् | 15 अंक |
| खण्ड ग | अनुप्रयुक्त व्याकरणम् | 30 अंक |
| खण्ड घ | पठित अवबोधनम् | 35 अंक |

ख) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

ग) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

घ) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

### खण्ड 'क' अपठित अवबोधनम्

1 अधोलिखितं अनुच्छेदं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत।

अध्ययनार्थम् विदेशं गन्तुकामः श्री मोहनदास कर्मचन्दः गांधी मातुरादेशप्राप्यर्थ प्रतिज्ञाम् अकरोत् -नाहं कदापि मदिरा सेविष्ये,नाहं मांसस्पर्शमपि विधास्यामि,पूर्णरूपेण ब्रह्मचर्य -व्रतमाचरिष्यामि इति स्व-प्रतिज्ञां पालयन् सः त्रीणि वर्षाणि विधिशास्त्रमधीतवान्।स्वदेशमागत्य सः मुम्बापुर्यां बैरिस्टरवृतिं प्रारभत्। शीघ्रमेव दक्षिणाफीकादेशं गत्वा तत्रत्यानां भारतीयानां गौराङ्गैः कृतां दुर्दशां विलोक्य तेषां समुद्धाराय अहिंसामूलस्य सत्याग्रहस्य उपायस्य प्रयोगमकरोत्, तेन च पूर्णां सफलतां प्राप्तवान्। तत्र तस्य उपायस्य साफल्यमनुभूय स्वदेशोद्धाराय अपि तस्य प्रयोगं कर्तुं स स्वदेशं प्रत्यागच्छत्।अत्रागत्य सः स्वदेशप्रेमिणा सहयोगेन अहिंसामूलस्य सत्याग्रहम् अचालयत्।सर्वे देशवासिनः तस्य विचारैः प्रभाविताः अभवन्।साम्प्रदायिकसद्भावं,परस्परं सहयोगं, देशहितचिन्तनं मातृभूमेः स्वाधीनता च मूलमन्त्रान् नीत्वा सः भारतं स्वतन्त्रं कारितवान्। अद्य गांधीमहोदयः सशरीरः नास्ति परं तस्य कीतिः सदैव स्थास्यति एव। कथितम् अपि - कीर्तिर्यस्य सः जीवति ।

(क) एकपदेन उत्तरत। 2

1 विदेशे महात्मा गांधी किम् अधीतवान्?

2 किमर्थं गांधी महोदयः विदेशम् अगच्छत्?

(ख) पूर्णवाक्येन उत्तरत। 2

दक्षिणाफीका देशम् गत्वा तत्रात्यानां दुर्दशां दृष्ट्वा तेषामुद्धाराय सः किं कृतवान्?

(ग) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 2

(घ) भाषिक कार्यम्। **4**

1 'स्वदेशमागत्य सः मुम्बापुर्यां बैरिस्टरवृत्तिं प्रारभत' सः इति पदं कस्मै प्रयुक्तम्?

(i) महात्मा (ii) गांधिने (iii) महात्मागांधी (iv) महात्मागांधिने

2 अनुच्छेदे ' पूर्णां सफलतां ' अत्र विशषण पदं किम्?

(i) पूर्णां (ii) पूर्णा (iii) सफलता (iv) सफलताम्

3 'प्रत्यागच्छत्' इति क्रियायाः कर्तृपदं किम्?

(i) कर्तुम् (ii) सः (iii) स्वदेशं (iv) प्रयोगं

4 अनुच्छेदे ' सपदि' पदस्य कः पर्यायः प्रयुक्तः?

(i) गत्वा (ii) पालयन् (iii) शीघ्रम् (iv) शीघ्रमेव

## खण्ड 'ख' रचनात्मक लेखनम्

**2** विद्यालयस्य पर्यटनकार्यक्रमस्य अनुमतिहेतोः पितरं प्रति पत्रं मञ्जूषायाः उचितपदैः पूरयत। **5**

पीतमपुरा,
दिल्लीतः
दिनांक : **02.02.2013**

प्रिये **1** ________

नमोनमः।

गतसप्ताहे तव **2** _______ प्राप्तं परम् अहं विद्यालयस्य भाषासप्ताहसमारोहे अतीव **3** _______ आसम् अतएव उत्तरं न दत्तवती। जानसि विद्यालये षड् भाषानाम् एकः **4** ______अभवत् भाषासप्ताहः इति। हिन्दी संस्कृत आंग्ल फ्रैंच जर्मन पंजाबी इति षड् भाषाः अधिकृत्य **5** ______ पर्यन्तं गतिविधयः अभवन्। तत्र अन्त्याक्षरी **6** _______ प्रश्नोत्तरी गीत गायनम् लघुनाटिकाः काव्यपाठः इत्यादयः अनेकाः गतिविधयः आसन्।संस्कृत दिवसे अहं **7**_______आसम् ।छात्राणाम् उत्साहः **8**_______ च दर्शनीयः आसीत्।अहं ईमेल माध्यमेन **9** ________ प्रेषयिष्यामि।शेषं शुभम्।

भवत्याः प्रियसखी।

**10** _______

(मञ्जूषा - मन्त्रपाठः, उल्लासः,पत्रम् ,अग्रिमे, संचालिका, गरिमा, छायाचित्राणि, व्यस्ता, समारोहः, षड् दिवसः)

**3** चित्रं दृष्टवा पञ्च वाक्यानि संस्कृते लिखत। **10**



मञ्जूषा - नृपः, शुकः, राजभवनम्, फलम्, हरितः, भव्यः, तल्लीनः, आश्चर्यचकितः, मन्त्री, हस्तसंकेतम्।

अथवा

मञ्जूषातः उचितानि पदानि चित्वा 'स्वच्छता अभियानम्' विषये पञ्चवाक्यानि रचयत।
(मञ्जूषा - प्लास्टिकस्यूताः, उद्योगेभ्यः , महानगरेषु , नदी , अवकरम् , कुर्याम, जलम् , विषमयम् , जीवनस्य मलिनम् , आधारः, रक्षाम्। )

## खण्ड 'ग' अनुप्रयुक्त व्याकरणम्

**4** **उचित शब्द रूपाणि चित्वा रिक्तस्थानानि पूरयत -** **6**

1 ' राजन् ' शब्दस्य षष्ठी विभक्तौ,बहुवचने रूपं भवति -
(i) राजाम् (ii) राजानाम् (iii) राज्ञाम् (iv) राजानम्

2 __________ शोभते जीवनम् न तु सौन्दर्येण ।
(i) आत्मना (ii) आत्मनः (iii) आत्मा (iv) आत्मानम्

3 आज्ञा __________हि अविचारणीया।
(i) विदुषाम् (ii) विद्वासः (iii) विदुषे (iv) विदुषा

4 एतत् जलं __________ नद्याः अस्ति।
(i) गच्छन्त्यः (ii) गच्छन्ती (iii) गच्छन्त्याः (iv) गच्छन्त्या

5 अहम् ____________स्वविवाहस्य निमन्त्रण - पत्रं ददामि।
(i) भवन्तम् (ii) भवते (iii) भवतम् (iv) भवताय

6 वृद्धानाम् आशीर्वादेन__________उद्धारः भवति ।
(i) आत्मनः (ii) आत्मस्य (iii) आत्मा (iv) आत्मानम्

**5** **मञ्जूषातः उचितं संख्यावाचकं पदं चित्वा वाक्यानि पूरयत।** **6**

1 _______ तरौ अष्टादश खगाः तिष्ठन्ति।
(i) एकस्मिन् (ii) एकः (iii) एकौ (iv) एका

2_____नदीषु गङ्गा सर्वा श्रेष्ठा।
(i) चत्वारिषु (ii) चतुर्षु (iii) चतसृषु (iv) चतसृसु

3 श्रीरामस्य_______ मातरः आसन्।
(i) तिस्त्रः (ii) त्रयः (iii) त्रि (iv) त्रयाः

4 _________ जनयोः परस्परम् मैत्री आसीत्।
(i) द्वौ (ii) द्वाभ्याम् (iii) द्वयोः (iv) द्वि

5 _______ बालकाय फलानि यच्छ।।
(i) एकाय (ii) एकस्मै (iii) एकस्यै (iv) एकस्या

6 _______ विद्वान् एव सर्वत्र पूज्यः अस्ति, अनेके मूर्खाः न।।
(i) एकान् (ii) एकः (iii) एकस्मै (iv) एका

**6** **अधोलिखित वाक्येषु उचित क्रियापदानि योजयित्वा वाक्यानि पूरयत।** **6**

1 सम्भवतः अद्य विद्यालये अवकाशः________।
(i) स्याः (ii) स्यात् (iii) स्यात (iv) स्याम

2 त्वम् अत्र स्थित्वा पितुः सेवाम् ________ ।
(i) कुर्यात् (ii) कुर्याः (iii) कुर्यात (iv) कुर्याम्

3 यूयम् वृथा मा ________ ।
(i) चिन्तयेत (ii) चिन्तयेः (iii) चिन्तयेत् (iv) चिन्तयन्तु

4 भवता विना मह्यम् किमपि न ________ ।
(i) रोचेरत् (ii) रोचेताम् (iii) रोचेत (iv) रोचयाः

5 एकः चन्द्रः तमः ________ ।

(i) हति (ii) हन्ति (iii) हतः (iv) हन्यात्

6 भक्तौ ईश्वरं _______ ।

(i) भजेताम् (ii) भजेरन् (iii) भजेम (iv) भजेयुः

**7 अधोलिखित वाक्येषु कोष्ठकगत शब्दं आधृत्य उचित उपपदविभक्ति प्रयोगेन पूरयत। 6**

1 ________ हीनः पशुभिः समानः। (धर्म)

(i) धर्मस्य (ii) धर्मात् (iii) धर्मेण (iv) धर्मे

2 ________ दक्षिणतः श्रीलंका अस्ति। ( भारत)

(i) भारतात् (ii) भारतस्य (iii) भारताय (iv) भारतम्

3 कृष्णः ________ प्रति अगच्छत्। (द्वारिका)

(i) द्वारिका (ii) द्वारिकाम् (iii) द्वारिकया (iv) द्वारिकायाः

4 ________ श्रेष्ठम् कमलम्। (पुष्प)

(i) पुष्पेषु (ii) पुष्पाणि (iii) पुष्पैः (iv) पुष्पेभ्यः

5 ________ समया नासिका अस्ति । (नेत्र)

(i) नेत्रेण (ii) नेत्रे (iii) नेत्राभ्याम् (iv) नेत्रयोः

6 ________ मा प्रमदितव्यम्। (स्वाध्याय)

(i) स्वाध्यायम् (ii) स्वाध्यायात् (iii) स्वाध्याये (iv) स्वाध्यायेन

**8 प्रदत्तविकल्पेभ्यःउचितं प्रत्ययान्त पदं चित्वा रिक्तस्थानानि पूरयत - 6**

1 अध्यापकाः ____________श्यामपट्टे लिखन्ति।

(i) पाठयतः (ii) पाठयन्तः (iii) पाठयन्ती (iv) पाठयत्

2 जीवने परिश्रमं कृत्वा एव ते सफलतां ____________ ।

(i) लब्धवान् (ii) लब्धवताः (iii) लब्धवन्तः (iv) लब्धवन्ताः

3 छात्रेण रामायणं ___________ ।

(i) श्रुतम् (ii) श्रुतेन (iii) श्रुतः (iv) श्रुता

4 वृक्षात् एकां आम्रम्____________ ।

(i) पतितवान् (ii) पतितवत् (iii) पतितवती (iv) पतितवन्तः

5 __________ दिवसः कदापि न आगच्छन्ति।

(i) गतः (ii) गता (iii) गताः (iv) गतम्

6 छात्रेण सुलेखः ____________ ।( लिख् + क्त )

(i) लिखितः (ii) लिखिता (iii) लिखितम् (iv) लिखति

## खण्ड 'घ' पठित अवबोधनम्

**9 अधोलिखितम् गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**(i) गद्यांशः -**

भोजः — साधु कुविन्द।साधु। ।कीदृशी लालित्यपूर्णा पदयोजना।"**कवयामि वयामि यामि**" — "धन्योऽसि त्वम् अहमपि आत्मानं धन्यं मन्ये— यस्य राज्ये तन्तुवायाः, कुम्भकाराः,अयस्काराः शिल्पिनः, श्रमिकाः अपि ललितां काव्यरचनां कुर्वन्ति।

(तन्तुवायं प्रति) भोः कविवरः गृहाण पुष्कलं स्वर्णमयं पारितोषिकम् निजावास च प्रयाहि।

(मंत्रिणं प्रति) पण्डित लक्ष्मीधरः मम राजभवने वासयितव्यः, यावद् अपरा व्यवस्था न भवति।

(क) एकपदेन उत्तरत। **1**

**1** पण्डितः कुत्र वासयितव्यः ?

**2** पदयोजना कीदृशी आसीत्?

(ख) पूर्णवाक्येन उत्तरत। **1**

तन्तुवायम् भोजः किम् आदिशति?

(ग) प्रदत्तविकल्पेभ्यः शुद्धम् उत्तरं चित्वा निर्देशानुसारं लिखत **1**

**1** 'काव्यरचनाम्' इति पदस्य विशेषणपदं किम्?

(i) साधु (ii) लालित्यपूर्णा (iii) आत्मानं (iv) ललिताम्

**2** 'अन्या' इत्यर्थे अत्र किम् पदं प्रयुक्तम्?

(i) यामि (ii) अपरा (iii) ललिताम् (iv) अपि

**(घ) मूल्यपरक - प्रश्नः- विद्या कस्य कृते महत्वपूर्णम् अस्ति ?** **1**

**(ii) पद्यांश ः-**

मूलं भुजङ्गैः शिखरं प्लवङ्गैः शाखा विहंगैः कुसुमानि भृङ्गैः।
नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्त्वभरैः समन्तात्।।

**1** चन्दनस्य मूलं कैः आश्रितम् ? **1**

**2** कैः चन्दनस्य शाखाः आश्रिताः? **1**

(क) पूर्णवाक्येन उत्तरत।

कस्य कुसुमानि भृङ्गैः आश्रितानि ? **1**

(ग) प्रदत्तविकल्पेभ्यः शुद्धम् उत्तरं चित्वा निर्देशानुसारं उत्तरत - **2**

**1** 'वानरैः' इत्यर्थे श्लोके किं पदं प्रयुक्तम्?

(i) भुजङ्गैः (ii) भृङ्गैः (iii) विहंगैः (iv) प्लवङ्गैः

**2** 'कुसुमानि' अस्य पदस्य द्वितीया विभक्तौ परिवर्तनम् कुरूत ?

(i) कुसुमाय (ii) कुसुमानि (iii) कुसुमेन (iv) न कोऽपि

**(घ) मूल्यपरक - प्रश्नः- वयं चन्दनस्य इव कीदृशं भवेम ?** **1**

**(iii) नाट्यांशः-**

प्रतापः - श्रुतपूर्व इव स्वरः। (सैनिकं प्रति) वृक्षम् आरूह्य दृश्यताम् कः एषः शब्दापयति ?

सैनिकः - (निपुणं निरीक्ष्य ) महाराज! मेवाडमन्त्री भामाशाहः खल्वेषः।

प्रतापः - अये ! भामाशाह आगतः। कथमस्माकम् दौर्भाग्यं भवताऽपि परिज्ञातम्
(भामाशाहः धनराशिमादाय आयाति)

भामाशाहः - (सप्रणामम् )अन्नदातः। सेवकं परित्यज्य कुत्र प्रस्थितो भवान् ?

प्रतापः - (दीर्घ निःश्वस्य ) न क्वापि बन्धो। गन्तुमपि न शक्यते। धनसेनयोः अभावे देशरक्षणाय पर्याकुलाः स्मः।

(क) एकपदेन उत्तरत। **1**

**1** तत्र कः आगतः आसीत् ?

**2** प्रतापः कयोः अभावः पर्याकुलाः आसीत् ?

(ख) पूर्णवाक्येन उत्तरत। **1**

कः किम् च आदाय आगच्छति?

(ग) प्रदत्तविकल्पेभ्यः शुद्धम् उत्तरं चित्वा निर्देशानुसारं उत्तरत - **2**

1 'अवलोक्य ' इत्यर्थे अत्र किम् पदं प्रयक्तम् ?

(i) क्वापि (ii) निपुणं (iii) निरीक्ष्य (iv) बन्धो

2 अत्र 'भवान्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) प्रतापाय (ii) सैनिकाय (iii) भामाशाहाय (iv) मन्त्रिणे

**(घ) मूल्यपरक - प्रश्नः- देशरक्षणाय कस्य मोहः न कर्त्तव्यम् ?** **1**

**10** अन्वयः रिक्तस्थानपूर्तिः कुरूत। **5**

(क) छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरूषा इव।।

अन्वयः - **1** _____ छायाम् कुर्वन्ति , **2** ______च आतपे **3**_____ ।(एतेषां) फलानि अपि **4**_____ (भवन्ति) ।वृक्षाः **5**_______ इव (आचरन्ति)।

(ख) विश्वबन्धुत्वमुद्घोषयत्पावनं
विश्ववन्द्यैश्चरित्रैर्जगत्पावयत्।
विश्वमेकं कुटुम्बं समालोकयत्
भूतले भाति मेऽनारतं भारतम्।।

अन्वयः — पावनम् विश्वबन्धुत्वम् **1** _____ विश्ववन्द्यैः, **2** _____ जगत्पावयत् विश्वम् एकम् **3**______समालोकयत् मे **4**_________भूतले **5**__________भाति।

मञ्जूषाः

| |
|---|
| उद्घोषयत् ,अन्यस्य , चरित्रैः , स्वयम् ,सत्पुरूषाः , कुटुम्बं, परार्थाय, भारतं , तिष्ठन्ति, अनारतं |

**11** रेखांकित पदानां स्थाने विकल्पेभ्यः उचितं प्रश्नवाचक पदं प्रयुज्य प्रश्नवाक्यानि लिखत— **5**

1 भारते गंगायमुनादयः <u>नद्यः</u> वहन्ति।

2 अत्र <u>जनाः</u> पीडिताः न भवेयुः।

3 मम भारतम् <u>पर्वतश्रेणिभिः</u> सम्पूजितं वर्तते।

4 भारतीय विज्ञान <u>सर्वहिताय</u> अस्ति।

5 <u>गुणग्राही</u> स्वामी पुण्येन लभते।

**12** अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत— **5**

1 दृष्टमात्रैव सा बलाका भस्मासादभूत।

2 एकदा तस्योपरि एका बलाका विष्ठाम् उदसृजत्।

3 आसीत् पुरा कोऽपि महातपा वनवासी मुनिः।

4 स च क्रुद्धस्तां व्यलोकयत्।

5 एकदा असौ मुनिः क्वापि नगरे एकं ब्राह्मणगृहमुपेत्य भिक्षामयाचत्।

6 ततश्च मुनिः तपः प्रभावाद् अहंकारमुपगतः।

7 प्रतीक्षस्व क्षणम् इति सा पतिव्रता गृहिणी तम् अवदत्।

8 एतत् श्रुत्वा सः मुनिः तां कोपदृष्ट्या दृष्टवान्।

9 तत् आकर्ण्य मुनिः विस्मितः जातः।

10 सा विहस्य अवदत् -मुनेःॐनाहं बलाका।

**13** अधोलिखितानां पदानां प्रसंगानुसारम् उचितं अर्थम् प्रदत्तविकल्पेभ्यः चित्वा लिखत। **5**

**1** खड्गेन **'जहि'** माम्।

(i) रक्ष (ii) मारय (iii) देहि (iv) गच्छ

**2** भारतं वर्तते मे परं **'सम्बलम्'** ।

(i) प्रवलता (ii) बलम् (iii) आश्रयः (iv) स्थानम्

**3** भारती **'वल्लकी'** झङ्कृतैर्झङ्कृतम्।

(i) सितार (ii) वीणा (iii) कापि (iv) ढक्का

**4** घटो नास्मि ' जलान्वितः'।

(i) जलदः (ii) जलपरिपूर्णः (iii) ज्वलनशीलः (iv) जलहीनः

**5** आनीतोऽयं **'कुविन्दः'**।

(i) गोविन्द (ii) कुम्भकारः (iii) तन्तुवायः (iv) वृषभः

-----------xxx----------